नैकान्तरक्तं दद्यात्तु वासुदेवाय चैलकम् ।
तथा नैकान्तरक्तन्तु शिवाय विनिवेदयेत् ॥
नीलीरक्तन्तु यद्वस्त्रं तत् सर्व्वत्र विवर्ज्जितम् ।
देवे पैत्रे स्वोपयोगे वर्ज्जयेत्तद्विचक्षणः ॥
नीलीरक्तं प्रमादात्तु यो दद्याद्विष्णवे बुधः ।
निष्फला तस्य तत्पूजा तदा भवति भैरव ॥
विचित्रे वाससि पुनर्लग्नं नीलीविरञ्जितम् ।
वस्त्रं दद्यान्महादेव्यै नान्यस्मै तु कदाचन ॥
द्विपदां ब्राह्मणो यद्वत् देवानां वासवो यथा ।
तथा भूषणवर्गेषु वस्त्रमुत्तममुच्यते ॥
वस्त्रेण त्रायते लज्जां वस्त्रेण त्रायते त्वघम् ।
वस्त्रात् स्यात् सर्व्वतः सिद्धिश्चतुर्व्वर्गप्रदञ्च तत् ॥"
इति कालिकापुराणे ६८ अध्यायः ॥
राज्ञा सदा वस्त्राच्छादितशरीरं कर्त्तव्यम् । यथा,—
"सर्व्वदा मङ्गलं रत्नं धारयेत् सह दूर्व्वया ।
अवस्त्राच्छादितं गात्रं न विप्रेभ्यः प्रदर्शयेत् ॥"
इति तत्रैव ८९ अध्यायः ॥
नीलवस्त्रं परिधाय विष्णुपूजननिषेधो यथा,—
वराह उवाच ।
"भूषितो नीलवस्त्रेण यो हि मामुपसर्पति ।
वर्षाणाञ्च शतं पञ्च कृमिर्भूत्वा स तिष्ठति ॥
तस्य वक्ष्यामि सुश्रोणि अपराधविशोधनम् ।
प्रायश्चित्तं विशालाक्षि येन मुच्येत किल्बिषात् ॥
व्रतं चान्द्रायणं कृत्वा विधिदृष्टेन कर्म्मणा ।
मुच्यते किल्बिषात् भूमे एवमेतन्न संशयः ॥"
इति वाराहे नीलवस्त्रपरीधानप्रायश्चित्तनामाध्यायः ॥ * ॥ विष्णुपूजने रक्तवस्त्रपरीधाननिषेधो यथा,—
वराह उवाच ।
"रक्तवस्त्रेण संयुक्तो यो हि मामुपसर्पति ।
तस्यापि शृणु सुश्रोणि कर्म्म संसारमोक्षणम् ॥
रजस्वलासु नारीषु रजो यत्तत् प्रवर्त्तते ।
तेनासौ रजसा स्पृष्टो कर्म्मदोषेण जानतः ॥
वर्षाणि दशपञ्चैव वसते तत्र निश्चयः ।
रजो भूत्वा महाभागे रक्तवस्त्रपरायणः ॥
प्रायश्चित्तं प्रवक्ष्यामि तस्य कायविशोधनम् ।
येन शुध्यन्ति वै भूमे पुरुषाः शाठ्यवर्ज्जिताः ॥
एकाहारं ततः कृत्वा दिनानि दश सप्त च ।
वायुभक्षो दिनत्रीणि दिनमेकं जलाशनः ॥
एवं स मुच्यते भूमे मम विप्रियकारकः ।
प्रायश्चित्तं ततः कृत्वा ममासौ रोचते सह ॥
एतत्ते कथितं भूमे रक्तवस्त्रविभूषितम् ।
प्रायश्चित्तं महाभागे सर्व्वं संसारमोक्षणम् ॥"
इति तत्रैव रक्तवस्त्रपरीधानप्रायश्चित्तम् ॥
परिधृतकृष्णवस्त्रस्य विष्णूपासननिषेधो यथा,—
"यः पुनः कृष्णवस्त्रेण मम कर्म्मपरायणः ।
देवि कर्म्माणि कुर्व्वीत तस्य वै पतनं शृणु ॥
घुणा वै पञ्चवर्षाणि काष्ठभक्षश्च जायते ।
मशकस्त्रीणि वर्षाणि कच्छस्त्रीणि च पञ्च च ॥
न च गच्छति संसारं मम कर्म्मपरायणः ।
पारावतश्च जायेत नववर्षाणि पञ्च च ।
जातो ममापराधेन स्थितः पारावतो भुवि ।
तिष्ठते मम पार्श्वेषु यत्रैवाहं प्रतिष्ठितः ॥
प्रायश्चित्तं प्रवक्ष्यामि तस्य संसारमोक्षणम् ।
येनासौ लभते सिद्धिं कृष्णवस्त्रापराधतः ॥
सप्ताहं यावकं भुक्त्वा त्रिरात्रं शक्तुपिण्डिकाम् ।
त्रीणि पिण्डान् त्रिरात्रन्तु एवं मुच्येत किल्बिषात् ॥
य एतेन विधानेन देवि कर्म्माणि कारयेत् ।
शुचिर्भागवतो भूत्वा मम मार्गानुसारकः ।
न स गच्छति संसारं मम लोकाय गच्छति ॥"
इति तत्रैव कृष्णवस्त्रपरीधानप्रायश्चित्तम् ॥
परिधृताधौतवस्त्रस्य विष्णुकर्म्मकरणनिषेधो यथा,—
वराह उवाच ।
"वाससा न च धौतेन यो मे कर्म्माणि कारयेत् ।
शुचिर्भागवतो भूत्वा मम मार्गानुसारकः ॥
तस्य दोषं प्रवक्ष्यामि अपराधं वसुन्धरे ।
पतन्ति येन संसारं वाससोच्छिष्टकारिणः ॥
देवि भूत्वा गजोन्मत्तस्तिष्ठत्येकं नरो भुवि ।
उष्ट्रश्चैकं भवेज्जन्म जन्म चैकं खरस्तथा ॥
गोमायुरेकजन्मा वै जन्म चैकं हयस्तथा ।
सारङ्गश्चैकजन्मा वै मृगो भवति चैकतः ॥
सप्तजन्मान्तरं पश्चात्ततो भवति मानुषः ।
मद्भक्तश्च गुणज्ञश्च मम कर्म्मपरायणः ।
निरापराधो दक्षश्च अहङ्कारविवर्ज्जितः ॥
धरण्युवाच ।
श्रुतमेतत् प्रयत्नेन यत्त्वया समुदाहृतम् ।
संसारं वाससोच्छिष्टं येन गच्छन्ति मानवाः ॥
प्रायश्चित्तञ्च मे ब्रूहि सर्व्वकर्म्मसुखावहम् ।
किल्बिषात् येन मुच्यन्ति तव कर्म्मपरायणाः ॥
वाराह उवाच ।
शृणु तत्त्वेन मे देवि कथ्यमानं मयानघे ।
प्रायश्चित्तं प्रवक्ष्यामि मम भक्तिपरायणः ॥
यावकेन दिनं त्रीणि पिण्याकेन पुनस्त्रयः ।
कणभक्षो दिनत्रीणि पायसेन दिनत्रयम् ॥
एवं कृत्वा महाभागे वाससोच्छिष्टकारिणः ।
अपराधं न विद्येत संसारञ्च न गच्छति ॥"
इति तत्रैव अधौतवासःपरिधानप्रायश्चित्तनामाध्यायः ॥ * ॥ अथ परिहितपरकीयवस्त्रस्य विष्णुपूजादिकरणे प्रायश्चित्तम् ।
वाराह उवाच ।
"यः पारक्येण वस्त्रेण नावधूतेन माधवि ।
प्रायश्चित्ती पुमान्मूर्खो मम कर्म्मपरायणः ॥
करोति मम कर्म्माणि स्पृष्ट्वा ते मां तमःस्थितः ।
मृगो वै जायते देवि वर्षाणि त्रीणि सप्त च ॥
हीनपादेन जायेत त्रैकजन्म वसुन्धरे ।
मूर्खश्च क्रोधनश्चैव मद्भक्तश्चैव जायते ॥
तस्य वक्ष्यामि सुश्रोणि प्रायश्चित्तं महौजसम् ।
येन गच्छति संसारं मम भक्तो व्यवस्थितः ॥
अष्टभक्तं ततः कृत्वा मम कर्म्मपरायणः ।
माघस्यैव तु मासस्य शुक्लपक्षस्य द्वादशी ॥
तिष्ठेज्जलाशये तत्र शान्तो दान्तो जितेन्द्रियः ।
अनन्यमानसो भूत्वा मम चिन्तापरायणः ॥
प्रभातायान्तु शर्व्वर्य्यां उदिते च दिवाकरे ।
पञ्चगव्यं ततः पीत्वा शीघ्रं मुच्येत किल्बिषात् ॥
य एतेन विधानेन प्रायश्चित्तं समाचरेत् ।
सर्व्वपापविनिर्मुक्तो मम लोकाय गच्छति ॥"
इति वाराहे परकीयवस्त्रपरीधानप्रायश्चित्तनामाध्यायः ॥ * ॥ काञ्चननिर्म्मितवस्त्रप्रमाणं यथा,—
"यावत् काञ्चनवस्त्राणां वाहिका गोपकन्यकाः ।
कार्त्तिकेयायमु: श्रीघ्रं यत्र चन्द्रावली मुदा ॥"
इति ब्रह्मवैवर्त्ते श्रीकृष्णजन्मखण्डे २८ अध्यायः ॥
"आसनं वसनं शय्या जायापत्यं कमण्डलुः ।
आत्मनः शुचिरेतानि न परेषां कदाचन ॥"
ईषद्धौतादिवस्त्रस्य पश्चिमाग्रादिप्रसारितवस्त्रस्य च अधौतत्वं यथा,—
"ईषद्धौतं स्त्रिया धौतं यद्धौतं रजकेन तु ।
अधौतं तद्विजानीयाद्दृष्ट्वा दक्षिणपश्चिमे ॥"
इति कर्म्मलोचनम् ॥ * ॥
सत्यतपाः ।
"प्रागग्रमुदगग्रं वा धौतं वस्त्रं प्रसारयेत् ।
पश्चिमाग्रं दक्षिणाग्रं पुनः प्रक्षालनात् शुचि ॥"
अन्याग्रं दृष्ट्वा तद्वत् ॥ * ॥ प्रचेताः ।
"स्वयं धौतेन कर्त्तव्या क्रिया धर्म्म्या विपश्चिता ।
न च राजकधौतेन नाधौतेन भवेत् क्वचित् ॥
पुत्त्रमित्त्रकलत्रेण स्वजातिबान्धवेन च ।
दासवर्गेण यद्धौतं तत् पवित्रमिति स्थितिः ॥"
आगोत्तरं उष्णीषवस्त्रस्य धार्य्यत्वं यथा ।
उष्णीषधारणं शिरोजलापनयनाय । तेन तदनन्तरं न धार्य्यम् । तथा महाभारतम् ।
"आप्लुतः साधिवासेन जलेन च सुगन्धिना ।
राजहंसनिभं प्राप्य उष्णीषं शिथिलार्पितम् ।
जलक्षयनिमित्तं वै वेष्टयामास मूर्द्धनि ॥"
शिथिलार्पितं अगाढ़बद्धम् ॥ * ॥ निषिद्धवस्त्राणि यथा । भारते ।
"न स्यूतेन न दग्धेन पारक्येण विशेषतः ।
मूषिकोत्कीर्णजीर्णेन कर्म्म कुर्य्याद्विचक्षणः ॥"
नारसिंहे ।
"न रक्तमुल्वणं वासो न नीलञ्च प्रशस्यते ।
मलाक्तञ्च दशाहीनं वर्ज्जयेदम्बरं बुधः ॥"
उल्वणं उत्कटरक्तविशेषणम् । आचाररत्ने उशनाः ।
"दशाहीनेन वस्त्रेण कुर्य्यात् कर्म्माण्यभावतः ।"
विष्णुधर्म्मोत्तरे ।
"वस्त्रं नान्यधृतं धार्य्यं न रक्तं मलिनं तथा ।
जीर्णं नापदशञ्चैव श्वेतं धार्य्यं प्रयत्नतः ॥
उपानहं नान्यधृतं ब्रह्मसूत्रञ्च धारयेत् ।
न जीर्णमलवद्वासो भवेच्च विभवे सति ॥"
योगियाज्ञवल्क्यः ।
"क्षालितं वाससी धौते अक्लिन्ने परिधाय च ।
प्रक्षाल्योरू मृदद्भिश्च हस्तौ प्रक्षालयेत्ततः ॥
अभावे धौतवस्त्राणां शाणक्षौमाविकानि च ।
कुतपो योगपट्टं वा द्विर्व्वासा येन वा भवेत् ॥